**विद्यास्थानानां विश्लेषणे, अध्ययने च आधुनिक तन्त्रज्ञानोपयोगः**

*वेदवारिधिः* **प. रामानुजः**

भारतीयपरम्परा तथा भाषाणां सङ्गणन कार्यनिष्ठे अस्मद्गणे प्रगतसङ्गणनविकासकेन्द्रे बेंगलूरुपरिसरे सङ्गणकयन्त्रसाहाय्येन द्वाविंशतेः वर्षेभ्यः क्रियमाणानुसन्धानविषये किञ्चिदत्र प्रस्तूयते । अन्तर्जाले चतुर्दशविद्यास्थानानां विषयेऽपि अस्माकं गणतः उपलभ्यमानसंसाधनानां दर्शनं उपयोगश्च अन्तर्जालपृष्ठे http://parankusan.cloudapp.net:8080/ihg, तथा अस्मत्पितृचरणानां कीर्तिशेषाणां सलक्षणघनपाठिनां महाविदुषां भूलोकनित्यसूरीणां पराङ्कुशाचार्यवर्याणां पुण्यस्मृतावायोजितायाः पराङ्कुशाचार्य वैदिक अध्ययन संस्थायाः अन्तर्जालपृष्ठे च http://www.parankusa.org इत्यत्र च शक्यम् ।

**वेदाः - ऋक्, यजुस्, साम, अथर्ववेदः - तेषां विषये उपलभ्यमानविषयविवरणानि**

1. ऋग्वेदे – संहितापाठः (मण्डल, अष्टक पद्धत्योः), पदपाठः, क्रमपाठः, ऋषिः, छन्दः, देवता, विनियोगः, ब्राह्मणं, आरण्यकं, उपनिषद्, **प्रतिग्रन्थं** विविधसूच्यः (मन्त्रसूची, पदसूची, सूक्तसूची, अनुवाकसूची, प्रपाठकसूची, समस्तपदसूची, समस्तानां उत्तरपदसूची), विकृतिपाठाः (जटा, घनः इत्यादि .. ) वेदाङ्गानि (शिक्षा, व्याकरणं, छन्दः, निरुक्तं, ज्यौतिषं, कल्पः – आश्वलायन श्रौत सूत्रम्, ऋग्विधानं), लघुऋक्तन्त्रं, लक्षणग्रन्थाः (प्रातिशाख्यं, सप्तलक्षणं, क्रमदीपिका, बोन्दलक्षणं, बैठ् परिभाषा, रावणबैट्, वर्णक्रमपाठः), पाण्डुलिपयः, ऋग्भाष्यं – सायणस्य, वेङ्कटमाधवस्य, मध्वाचार्याणां च, ऋक्सूक्तनिरुक्तं, यान्त्रिक-प्रक्रियाः, विदुषाम् उपन्यासाः इत्यादयः
2. कृष्णयजुर्वेदे – संहितापाठः (सारस्वत, आर्षेय क्रमयोः), पदपाठः, क्रमपाठः, काण्डऋषिः, छन्दः, देवता, विनियोगः – अनुवाकार्थ संग्रहः (सायणीयः भट्टभास्करीयश्च), काण्ड, प्रश्नादि प्रतिपाद्यसंग्रहः (आर्षेयपाठात्), ब्राह्मणं, आरण्यकं, उपनिषद्, एकाग्नि काण्डः, काठकं, **प्रतिग्रन्थं** विविधसूच्यः (मन्त्रसूची, पदसूची, पञ्चाशद्, दशतिसूची, प्रश्नसूची, अनुवाकसूची, इङ्ग्यपदसूची, इङ्ग्यानां उत्तरपदसूची), विकृतिपाठाः (जटा, घनः इत्यादि .. ) वेदाङ्गानि (शिक्षा – व्यास, भारद्वाज, आरण्यक, कौण्डिन्य, शम्भु, प्लुत, वासिष्ठ, कालनिर्णय, पारि), व्याकरणं, छन्दः, निरुक्तं, ज्यौतिषं, कल्पः – आपस्तंब, बौधायन, मानव, सत्याषाढ श्रौत सूत्राणि, श्रौतं, गृह्य, धर्म, परिभाषा, शुल्ब, पितृमेध सूत्राणि सव्याख्यानि), लक्षणग्रन्थाः (मूलं, व्याख्याश्च - प्रातिशाख्यं, सप्तलक्षणं, षड्विंशतिसूत्रं, जटादर्पणः, घनदर्पणः, काण्डानुक्रमणिका, वर्णक्रमदर्पणः, वैद्यनाथ बैट्, रावणबैट्, अनेके स्वरविषयकग्रन्थाः), - पाण्डुलिपयः, तासां टङ्कितानि, भाष्ये – सायणीय, भट्टभास्करीयौ, यान्त्रिक-प्रक्रियाः, वेदवेदिकादि लेखनानि, स्वरमञ्जरी प्रभृतयः, विदुषाम् उपन्यासाः
3. शुक्लयजुषि उपलभ्यमानपर्यन्तं – संहिता, पदपाठः, भाष्यं – अनन्ताचार्यस्य, सूच्यादि, अनन्ताचार्यभाष्यं, यान्त्रिक-प्रक्रियाः, विदुषाम् उपन्यासाः
4. सामवेदे – कौथुमशाखायां - आर्चिकपाठः (पूर्व, महानाम्नी, उत्तर आर्चिकयोः), पदपाठः – छन्दः, स्तोभः, ऋषिः, छन्दः, देवता, विनियोगः, सप्तस्वरादि, गानं – रहस्य, ऊह, आरण्यगेय), भाष्यं, **प्रतिग्रन्थं** विविधसूच्यः (सामसूची, पदसूची, अर्धसूची, अनुवाकसूची, प्रपाठकसूची, समस्तपदसूची, समस्तानां उत्तरपदसूची), वेदाङ्गानि (शिक्षा, व्याकरणं, छन्दः, निरुक्तं, ज्यौतिषं, कल्पः – खादिर गृह्य, श्रौत सूत्रम्), लक्षणग्रन्थाः (पुष्पसूत्रं), सप्तलक्षणं, यान्त्रिक-प्रक्रियाः, जैमिनीयशाखाविषयकाः पाण्डुलिपयः, विदुषाम् उपन्यासाः
5. अथर्ववेद पैप्पलादसंहिता, सूच्यः, यान्त्रिक-प्रक्रियाः

6. दोषापाकरणेन सम्पादनं, दृष्टान्तानां झटिति आकरान्वेषणम्, अपेक्षितस्थले उपस्थापनं, संबन्धनं च, लिप्यन्तरणं, विदुषाम् उपन्यासानां लेखनं, आकरप्रदर्शनरूप सन्दर्भदानं, ग्रन्थान्तरैः यथापेक्षं संबन्धनं च
7. एवमेव वेदाङ्गानां उपाङ्गानां च विषये सर्वे आकरग्रन्थाः, सूत्र, वार्तिक, भाष्यादि च यथायथम् आयोजितमस्ति ।
8. एषां गवेषण, विश्लेषणाद्यर्थं संगणकयन्त्राधारित प्रकल्पाः अपि अस्मिन् जालपुटे लभ्याः सन्ति ।
9. एतैः आधुनिकरीत्या प्राचीनज्ञानभाण्डारस्य आस्वादनं सुकरं, रोचकं च भवेदित्याशास्महे ।
10. अत्रत्य विषयाणां विषये स्वाभिप्राय, दोषनिर्देश, समीकरणसलहादयः विद्वद्भ्यः सर्वदा स्वागतं भजन्ते अस्मत्पक्षतः इति कृपया विद्वांसः विशेषज्ञाः तन्त्रज्ञाश्च एतमामूलचूडं दृष्ट्वा स्वाभिप्रायदिभिः अनुगृह्णन्तविति प्रार्थ्यते ।